The *Śiṣyadhīvṛddhidatantra* of Ācārya Lalla (ca. beginning of the eighth century CE) consists of 22 chapters, the first 13 forming the *Gaṇitādhyāya* and the remaining 9 chapters forming the *Golādhyāya*. It is the only astronomical work of Lalla that is still extant. This present electronic edition, typed for the Gauḍīya Grantha Mandira (`www.granthamandira.org`) by Toke Lindegaard Knudsen, consists of chapter 20 (chapter 7 of the *Golādhyāya*), entitled *Mithyājñāna*. This chapter, in which Lalla criticizes a number of astronomical ideas found in the *purāṇa*s, such as the Earth being flat, the Sun being closer than the Moon, Rāhu being the cause of eclipses, etc., is interesting in that it shows the reaction of indigenous astronomers to the cosmology described in the *purāṇa*s.

The printed edition used is:

- *Śiṣyadhīvṛddhida Tantra of Lalla with the Commentary of Mallikārjuna Sūri.* Critically edited with introduction, English translation, mathematical notes and indices by Bina Chatterjee. Two volumes. New Delhi: Indian National Science Academy, 1981.

Copenhagen, Denmark
December 31, 2003

लल्लाचार्यविरचितं

# शिष्यधीवृद्धिदतन्त्रम्

## अथ मिथ्याज्ञानं नाम विंशत्यध्यायः

संस्थानमशेषमितीरितं ब्रह्माण्डोदरवर्तिनामिदम् ।
प्रतिवादिवचांसि शृण्वतो मनसि भ्रान्तिरिवावतिष्ठते ॥ १ ॥
यत एवमतः कुहेतुमद्वचनानि प्रथमं ब्रवीम्यहम् ।
उपपत्तिमदागमं ततो मनसः स्थैर्यकरं परिस्फुटम् ॥ २ ॥
असुरामरवासरं क्रमादयनं दक्षिणमुत्तरं जगुः ।
हिमदीधितितिग्मतेजसोर्ग्रहणं राहुकृतं तथापरे ॥ ३ ॥
उपरीन्दुमधो दिवाकरं तमसा मेरुभुवा विभावरी ।
प्रतिवासरमिन्दुमण्डलं विबुधैः पीयत इत्यतः कृशम् ॥ ४ ॥
ककुभश्च सुमेरुभूभृतो युगलं चन्द्रमसोस्तथार्कयोः ।
पितृवासरमादितो सितं सितपक्षं च वदन्ति शर्वरीम् ॥ ५ ॥
अमितामवनीं प्रचक्षते सुसमां केचन दर्पणोपमाम् ।
अपरे बहुयोजनामिमां सलिलस्थामथ यानपात्रवत् ॥ ६ ॥
कमठाहिवराहदिग्गजैः कुलशैलैर्विधृतामथापरे ।
जगुरूर्ध्वमथ प्रयात्यधो रथचक्रभ्रमवद्भ्रमत्यपि ॥ ७ ॥
मिथुनान्तसमीपसंस्थितो यदि यज्ञांशभुजां दिवाकरः ।
सततं समुपैति दृक्पथं न कुलीरे वद केन हेतुना ॥ ८ ॥
अपमस्य वशात्समुन्नमन्क्रमशो यत्र स यत्र वीक्षितः ।
विनमन्नपि तद्वशात्तथा विपरीतं च कथं न दृश्यते ॥ ९ ॥
रज्ज्वा सहितो यथा हयो भ्रममाणो निकटेऽथ दूरगः ।

तद्वद्रविमीक्षते सुरा रजनीचक्रपदे समं कथम् ॥ १० ॥
पिहिते यदि मेरुणा रवौ मनुजानामिह शर्वरी भवेत् ।
कथयस्व कथं सुधाभुजां रजनी जायते इत्ययुक्तिमत् ॥ ११ ॥
दिनभर्तरि याति दक्षिणां वणिजो मेरुसदां सदा निशा ।
सौम्यां सुरविद्विषामजादपरां भूपिहिते नृणामपि ॥ १२ ॥
विपरीतदिशा दिवाकराच्छाया दीर्घतरा तरोर्यथा ।
अवनेरपि जायते तथा सुरदैतेयनृणां तथा निशा ॥ १३ ॥
यदुदेति रविः समन्ततः कथमाशास्तदमर्त्यभूभृतः ।
प्राची प्रथमोदयेन चेत्तत्रैवास्तमयेन का भवेत् ॥ १४ ॥
केषांचिदुदग् दिवाकरः पुरतः पृष्ठगतः परस्य च ।
इतरस्य तदैव दक्षिणः परमार्थात्ककुभो न कुत्रचित् ॥ १५ ॥
सवितारमवेक्ष्य शीतगोरुपरिष्टात्पितरः स्वमूर्ध्वगम् ।
असितान्ततिथौ ततः परं न च पश्यन्ति कथं सिते दले ॥ १६ ॥
उदये ऽस्तमये यथा नरैर्ग्रहणं तिग्मकरस्य दृश्यते ।
निकटोत्तरदिग्गते विधौ किल तद्वद्विबुधैर्न तत्तथा ॥ १७ ॥
अरिणा हरिणा किलामृतं पिबतो देवरिपोर्दितं शिरः ।
व्यसुतां न गतं ग्रहाधिपो ग्रसितः प्राहुरिदं च राहुवत् ॥ १८ ॥
रविशीतगुमण्डलाकृति द्युगतं कृष्णतया न दृश्यते ।
किल पर्वणि याति दर्शनं वरदानादरविन्दजन्मनः ॥ १९ ॥
मुखपुच्छयुतं भुजङ्गमं जगुरेके तम एव केवलम् ।
अपरे ऽसुरमेव यायिनं द्वयमन्ये ऽथ परे यथेष्टगम् ॥ २० ॥
यदि काययुतो ऽथ मण्डली भविचारी खचरः शिरो ऽथवा ।
नियतां गतिमुद्वहन्कथं भगणार्धान्तरितो ग्रसत्यगुः ॥ २१ ॥
असुरो यदि मायया युतो नियतो ऽतिग्रसतीति ते मतम् ।

गणितेन कथं स लभ्यते ग्रहकृत्पर्व विना कथञ्चन ॥ २२ ॥
यदि राहुयुते मिथो ऽस्तगे क्षितिजस्थे हिमधाम्नि सग्रहे ।
इतरेण कथं दिवाकरो दितबिम्बः समगेन नेक्ष्यते ॥ २३ ॥
पुच्छेन मुखेन यद्यहिर्ग्रसतीति प्रतिवादिनो जगुः ।
मध्ये मुखपुच्छयोः स्थितं भगणार्धं न समावृणोति किम् ॥ २४ ॥
प्रथमं रविमण्डलं यतो न ततः खण्डितमिन्दुमण्डलम् ।
न समाकृतिरीक्ष्यते स्थितिर्यदतो राहुकृतो न स ग्रहः ॥ २५ ॥
सवितुश्च यदन्यथान्यथा प्रतिदेशं सकलं समीक्ष्यते ।
न च कुत्रचिदित्यवेत्य कः कुरुते राहुकृते ग्रहे ग्रहम् ॥ २६ ॥
ग्रहणे कमलासनानुभावाद्धुतदत्तांशभुजो ऽस्य सन्निधानम् ।
यदतः स्मृतिवेदसंहितासु ग्रहणं राहुकृतं गतं प्रसिद्धम् ॥ २७ ॥
यदि शीतगुरूर्ध्वमुष्णरश्मेरुडुवत्किन्न भवेत्सदा सितो षौ ।
ग्रहणं स भवेद्रवेर्न चेन्दोर्भूच्छायाग्रमपास्य दूरगस्य ॥ २८ ॥
अथ शापवशात्परिक्षयः स्याद्विबुधैर्वा शशिनो निपीतमूर्तिः ।
गणितेन चयक्षयौ कथं स्तो यदि पीतश्च समीक्ष्यते स कृष्णः ॥ २९ ॥
अमिता यदि भूरियोजना वा क्षितिरह्ना परिवर्त्यते कथं भैः ।
परिधेः खलु षोडशे स्थितांशे न च लङ्काविषयाद्भवत्यवन्ती ॥ ३० ॥
ग्रहणं ग्रहसङ्गमोदयौ शशिशृङ्गोन्नतिरिष्टभाविधिः ।
स्यात्प्रत्ययपञ्चकं स्फुटं क्षितिमानेन भवेन्महत्कथम् ॥ ३१ ॥
खखषड्कयमैर् २१६०० मिताः कला ग्रहचक्रे वलये व्यवस्थिताः ।
स्वफलस्यकुवृत्तयोजनैरनुपातादमिता कथं मही ॥ ३२ ॥
यदि वृत्तवशेन गच्छताममिता भात्यथ भूरियोजना ।
परितस्तु तदा तथाविधा परिमाणं त्विदमेव नापरम् ॥ ३३ ॥
यदि दर्पणवत्समा मही कथमम्भो गगनात्परिच्युतम् ।

स्थिरतामपहाय यात्यहो जवमाश्रित्य दिशैकया महत् ॥ ३४ ॥
प्रगुणः परिधेः शतांशकोगणितज्ञाः कथयन्ति दृश्यते ।
प्रतिभाति तदा समा मही विषये यत्र तथैव गम्यते ॥ ३५ ॥
समता यदि विद्यते भुवस्तरवस्तालनिभा बहूच्छ्रयाः ।
कथमेव न दृष्टिगोचरं नुरहो यान्ति सुदूरसंस्थिताः ॥ ३६ ॥
परितः क्षितिजे प्रदृश्यते गगनं सङ्गमुपागतं नृभिः ।
तस्यावनिरन्तरे स्थिता सुसमा दर्पणवद्विभाव्यते ॥ ३७ ॥
यदि गच्छति भूरधोमुखी गगने क्षिप्तमुपैति नो महीम् ।
यदि चोर्ध्वमुपैति सा सदा निकटं किं न भवेद्गपञ्जरः ॥ ३८ ॥
सलिले विलयो मृदो भवेदिति गोरप्सु न युज्यते स्थितिः ।
अथ पात्रगतेति तत्कथं न भवेद्यावदिलैव पार्थिवम् ॥ ३९ ॥
यदि वाम्भसि संस्थिता मही सलिलं तद्ध्रुवदप्रतिष्ठितम् ॥ ४० ॥
कमठादिभिरुद्धृता मही यदि ते केन धृता नभःस्थिताः ।
अत एषां वियति स्थितिर्यदि क्षितिगोलस्य तु केन वार्यते ॥ ४१ ॥
यदि च भ्रमति क्षमा तदा स्वकुलायं कथमाप्नुयुः खगाः ।
इषवो ऽभिनभः समुज्झितानिपतन्तः स्युरपांपतेर्दिशि ॥ ४२ ॥
पूर्वाभिमुखे भ्रमे भुवो वरुणाशाभिमुखो व्रजेद्घनः ।
अथ मन्दगमात्तदा भवेत्कथमेकेन दिवा परिभ्रमः ॥ ४३ ॥
द्वितयं दिनरात्रिनाथयोः कथमेकान्तरितं तदुद्व्रजेत् ।
यदि किं ध्रुवतारकातिमेर्दिवसेनैव परिभ्रमः ॥ ४४ ॥
तडिताहतवृक्षकीलकः किल संयोगमवाप्य भेषजैः ।
गगने निहितो ऽवतिष्ठते रसमौल्यादिविधेर्यथाम्बुजम् ॥ ४५ ॥
रसतैलजलैः स्वयंवहं क्रियते यन्त्रमचिन्तनं यथा ।
परमात्मवशेन स्वस्थितिर्ग्रहचक्रस्य परिभ्रमस्तथा ॥ ४६ ॥

आसीद्ध्वान्तमिदं ततो ऽम्भसि बभूवाण्डं स्वरूपदिलं
   तस्मिन्विश्वकृदर्कचन्द्रनयनो ब्रह्मा किलाभूत्पुरा ।
द्रव्यादीन्कणभुक्प्रधानपुरुषौ साङ्ख्यो ऽवदत्कारणं
   विश्वस्यास्य तथा स्वभावमपरे कर्मार्थकालं जगुः ॥ ४७ ॥
रजोगुणसमन्वितात्कमलजन्मनः प्राणिनो
   भवन्ति भगवानवत्यपि च सत्ययुक्तो हरिः ।
हरो हरति तामसीं समवलम्ब्य वृत्तिं परे
   जगुस्त्रितयमप्यजः क्रियत इच्छयैवैककः ॥ ४८ ॥
जगदिदमखिलं कृतं येन केनापि पृथ्वीनगाम्भोधिदेवापगादानवै-
   र्नरहयखरकुञ्जराजातिस्सिहैणगोसैरिभैर्वानरोक्षोष्ट्रपक्ष्यादिभिः ।
अहिनकुलशृगालमार्जारगोधाशशद्वीपिखड्गाम्बुजस्वेदजोद्भिज्जकै-
   र्मणिरजतसुवर्णताम्रैस्तथा बाल्यवार्धक्यकामादिभिश्चापि तस्मै नमः
॥ ४९ ॥

॥ इति श्रीलल्लाचार्यविरचिते गोले मिथ्याज्ञानाध्यायः सप्तमः ॥

फिरङ्गिणा तोकाख्येन परोपकारार्थमिदं पुस्तकं लिखितम् ।श्रीरस्तु ॥